শ্রীঃ
শ্রীমতে রামানুজায নমঃ
শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥ শ্রী সারনাথস্তোত্রম্ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥ শ্রী সারনাথস্তোত্রম্ ॥

সারক্ষেত্রপতিং সরোজজপতিং সারাতিদূরং সদা
সারং সারৱিমানগং সুরৱরং সারেশ্ৱরীনাযকম্।
নিত্যং সারসরোৱরে ৱিরচিতস্নানদ্বিজারাধিতং
সংসারাব্ধিতরিং সরোজনযনং তং সারনাথং ভজে ॥ **1** ॥

সর্ৱতত্ত্বালয শ্রীমন্ ৱ্যাকৃতাঘশিরো হরে।
পরমাত্মন্ সারনাথ রক্ষ মাম্ শরণাগতম্ ॥ **2** ॥

সমস্তজগদাধার শঙ্খচক্রগদাধর।
সারনাথ মমানুজ্ঞাং দেহি ৎৱত্তীর্থসেৱনে ॥ **3** ॥

সারক্ষেত্রে সারনাথঃ সারপুষ্করিণীতটে।
রমযা সারনাযক্যা ৱিমানে সারসংজ্ঞকে ॥ **4** ॥

অৱ্যাজকৃপযা নিত্যং তত্র সন্নিহিতো হরিঃ।
শ্রিতাভীষ্টং দদন্নিত্যং মোদতে সূরিভিঃ সহ ॥ **5** ॥

পঞ্চসারমিদং নিত্যং যঃ স্মরেৎ প্রযতঃ পুমান্।
স সর্ৱানর্থিতানর্থান্ ধ্রুৱমাপ্নোতি পূরুষঃ ॥ **6** ॥

নাচ্যারুচারুৱদনাম্বুজরাজহংসং
সৎসারৱচ্চরিতপূর্ণমুদারহাসম্।
সংসারসাগরতরিং হৃদযাব্জৱাসং
তং শ্রীনিৱাসমভজং স্ৱরমাৱতংসম্ ॥ **7** ॥

নমস্তে সারনাথায কাৱেরীৱরদাযিনে।
সর্ৱপাপৱিনাশায সর্ৱাভীষ্টপ্রদাযিনে॥ **8** ॥

সারক্ষেত্রনিৱাসায সারপুষ্করিণীতটে।
যস্য প্রসাদাৎ কাৱেরী গঙ্গাধিক্যং পুরা গতা॥ **9** ॥

ভক্তাভীষ্টফলপ্রদাঙ্ঘ্রিযুগলং কৌশেযরাজৎকটিং
লক্ষ্মীমঙ্গলমন্দিরোরসি লসন্মুক্তাৱলীকৌস্তুভম্।
হস্তৈঃ শঙ্খরথাঙ্গপঙ্কজগদা বিভ্রাণমভ্রাকৃতিং
রাকাচন্দ্রমুখং সুজাতমকুটং শ্রীসারনাথং ভজে॥ **10** ॥

সারক্ষেত্রে পৱিত্রে সুজনসুখকরে সারকাসারতীরে
সারাখ্যৱ্যোমযানে ৱিরচিতনিলযঃ সারনেত্র্যা সমেতঃ।
সারাম্ভোধানকঞ্জাযিতনযনযুগঃ ফালসৌন্দর্যসারঃ
সংসারাব্ধেরসারাৎ স হরিরৱতু মাং সারনাথো রমেশঃ॥ **11** ॥

আলোড্য চিন্তিতপদা শ্রুতিরাহ যস্মা -
দাস্তম্বমাম্বুজভৱেন্দুশিরোমণিভ্যাম্।
উৎপত্তিজীৱনলযানুদিতান্যযোগ -
হানং শ্রিযঃপতিমমুং হৃদি চিন্তযামঃ॥ **12** ॥

যস্মাদথর্ৱশিখযা দ্রুহিণস্ৱমূর্তি -
রুদ্রেন্দ্রমূলজগতোঽভিহিতা প্রসূতিঃ।
পৈঙ্গ্যশ্রুতিস্ফুটগতিপ্রতিপন্নরূপা
পদ্মাসনং তমনিশং প্রণমামি দেৱম্॥ **13** ॥

যৎপত্নীদৃষ্টিলেশাদ্ দ্রুহিণহরমুখা লব্ধসত্তাঃ সুরেন্দ্রা
যদ্ভক্তানাং নিযম্যাঃ সকলসুরগণা ব্রহ্মরুদ্রেন্দ্রমুখ্যাঃ।
যৎপাদক্ষালনাম্বু প্রথযতি শুচিতাং চন্দ্রমৌলেশ্চ লোকে
তস্মৈ নারাযণায প্রৱিতনুত নুতিং সর্ৱভূতান্তরায॥ **14** ॥

ব্রহ্মেশাদের্নিযন্তা পরমপুরুষ ইত্যাহ নিত্যা হি ৱাণী
    পুংৱাক্যৈস্তস্য বাধঃ কথমিৱ ভৱিতা প্রাপ্তদোষপ্রভেদৈঃ।
দূরাপাস্তং চ গৌরীমধুমথনভিদাবাধকং ৱাক্যজালং
    লক্ষ্মীশং তং প্রপদ্যে প্রতিভটরহিতপ্রাভৱোদ্ভূতিভৱ্যম্॥ **15**॥

ৱেদান্তেষু প্রতীতাৎ তদিতরভজনাদ্ যস্য ভক্তিঃ প্রকৃষ্টা
    তত্রৈৱ স্থানমগ্র্যং স্ফুরতি ৱিধিশিৱস্থানতোঽপ্যূর্ধ্ৱদেশে।
লক্ষ্ম্যা সার্ধং তমেকং হৃদযসরসিজে ব্রহ্মৱিদ্যাপ্রদাত্র্যা
    দেৱং নারাযণাখ্যং ভৱজলধিসমুত্তারণং সংশ্রযামঃ॥ **16**॥

॥ শ্রী সারনাথস্তোত্রং সমাপ্তম্॥